RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-21/5379/2014-2016

॥ ओ३म् ॥

प्रत्युत्थानं च युद्धं च
संविभागं च बन्धुषु।
स्वयमाक्रम्य भुक्तं च
शिक्षेच्चत्वारि कुक्कुटात्॥

( चाणक्य-नीति )

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत-संवाद:

पाक्षिकं समाचारपत्रम्

॥ ओ३म् ॥

य एतान् विंशतिगुणाना-
चारिष्यति मानव:।
कार्याऽवस्थासु सर्वासु अजेय:
स भविष्यति॥

( चाणक्य-नीति )

संपादकीयकार्यालय: ए-२/३२, वजीराबाद मार्ग:, भजनपुरा, देहली-११००५३, दूरभाष: ९३११०८६७५१
ई-मेल: sanskritsamvad@gmail.com
मूल्यम्-रू. ५/- द्विवार्षिक शुल्कम्-रू. २४०/-

卐 वर्षम्-५ 卐 अंक:-१९ ( ११५ ) 卐 १ अप्रेलमास: २०१६त: १५ अप्रेलमास: २०१६ पर्यन्तम् 卐 विक्रमसंवत्-२०७२-२०७३ 卐 सृष्टिसंवत्-१,९६,०८,५३,११५ 卐 पृष्ठम्-८

## दिल्लीसंस्कृताकादम्या त्रिदिवसीय अखिलभारतीयसंस्कृतसम्मेलनस्यायोजनम्

नवदेहली । संस्कृभाषाया: साहित्यं नैकेषाम् अमूल्यग्रन्थानां वारिधि: वर्तते । एतादृशं साहित्यं न कस्यापि अन्याया: भाज्ञाया: वर्तते । संस्कृते धार्मिक-आध्यात्मिक-दार्शनिक-वैज्ञानिक-मानवीयादिविधिविषयाणां सविस्तारपूर्वकं सम्मुलेख:




प्राप्यते । भारतीयसंस्कृति: प्राचीनकालादेव पंथनिरपेक्षा आसीत् इति विचायोऽयं दिल्लीसंस्कृताकादम्या देहल्यां विज्ञानभवने समायोजितायां त्रिदिवसीय-अखिलभारतीयसंस्कृतसम्मेलनस्य शुभारम्भे दिल्लीसर्वकारस्य पर्यटन-कला-संस्कृति-जल एवं भाषाविभागस्य मन्त्रिभि: श्रीकपिलमिश्रमहोदयेन प्रतिपादित: । तै: सम्मेलने अस्मिन् समुपस्थिता: विद्वांस: विनिवेदिता: यत् काचित् विशिष्टिां योजनां प्रदर्शन्तु येन संस्कृतं देहल्या: राजभाषा भवेदिति । तै: आश्वासनं प्रदत्तं यत् संस्कृतस्य प्रसारे न काचित् अल्पता भविष्यतीति । अस्मिन्नवसरे प्रस्तावनायामकादम्या: सचिवै: डॉ.जीतरामभट्टमहोदयै: कथितं यत् अस्य कार्यक्रमस्य उद्घाटनावसरे समग्रदेशत: 1300विदुषां सहभागिता वर्तते । कार्यक्रमस्य शुभारम्भे अतिथिभि: दीपप्रज्जवालनं मातु: सरस्वत्याश्च वन्दना कृता । अस्मिन्नवसरे श्रीलालबहादुरशास्त्रीसंस्कृतविद्यापीठस्य कुलपतिभि: प्रो. रमेष्ठाकुमारपाण्डेयमहोदयै: कथितं यत् देहल्यां संचाल्यामानां गुरुकुलानां विद्यार्थीनां च स्थिति: दयनीया वर्तते यतोहि एतेषां गुरुकुलानां मान्यतार्थ काचित् अधिकृतसंस्था नैव विद्यते । ते अन्येषां राज्यानां शिक्षणसंस्थासु निर्भरा: सन्ति । तै: समुपस्थितविदुषां समक्षे प्रस्तावितं यत् दिल्लीप्रान्तस्य सर्वेषां गुरुकुलानां पाठशालानां

शेषभाग:द्वितीयपुटे

## साहित्योत्सवे संस्कृतप्रतिभागिता

- नारायणदाश:,
कलिकाता। युवपुरस्कारं बालपुरस्कारम् अनुवादपुरस्कारमतिरिच्य केन्द्रसाहित्येकादम्या भारतीयभाषाविद्वांस:



प्रतिवर्षं मुख्यपुरस्कारेणापि समर्चिता: भवन्ति। मुख्यपुरस्कारप्रदानमभिलक्ष्य साहित्येकादम्या प्रतिवर्षं सप्ताहव्यापी

शेषभाग:द्वितीयपुटे

## पाटणनगरे ऐषम: श्रीहेमचन्द्र-समारोह: सम्पन्न: ।।

प्रो. कमलेशकुमार छ. चोकसी

गुजरातप्रदेशस्य ऐतिहासिके पाटणनगरे मार्चमासस्य विदतासु पञ्च-षड्-सप्तमासु तिथिषु श्रीहेमचन्द्र-समारोह: सोल्लासम् सम्पन्न: । अस्यां गोष्ठ्याम् काशी-हिन्दू-विश्वविद्यालयत: तत्रभवन्त: प्रॉ. डॉ. श्रीसदाशिवकुमार-द्विवेदिन:, आई. आई. टी. मुम्बापुरीत: प्रॉ.डॉ. श्रीमल्हार-कुलकर्णीमहोदया: च सारस्वतातिथिरूपेण समुपस्थिता:




अस्मिन् श्रीहेमचन्द्रसमारोहे कलिकालसर्वज्ञस्य आचार्यहेमचन्द्रस्य विविधान् ग्रन्थान् अधिकृत्यैका अखिलभारतीया सङ्गोष्ठी सम्पन्ना । डॉ. श्रीसदाशिवकुमार-द्विवेदिमहोदयै: हेमचन्द्रस्य

शेषभाग:द्वितीयपुटे

## संस्कृतस्योत्थानाय प्रधानमन्त्रीमहोदया: ज्ञापिता:

नवदेहली । संस्कृतशिक्षकाणां विद्वत्जनानां च प्रतिनिधि मण्डलेन सांसदानां श्रीओमप्रकाशयादवमहोदयानां नेतृत्वे प्रधनमन्त्रीभि: श्रीनरेन्द्रमादीमहाभागै: सह मेलनं कृतम् । प्रतिनिधि मण्डलपक्षत: संस्कृतभाषाया: उत्थानस्य सन्दर्भे 1320हस्ताक्षरयुतं



ज्ञापनपत्रं प्रधानमन्त्रीमहोदयानां कृते समर्पितम् ।

अस्मिन् ज्ञापनपत्रे स्वायतविद्यालयेषु त्रिभाषासूत्रस्य पालनविषये, सर्वेषु केन्द्रीयविश्वविद्यालयेषु संस्कृतविभागानां प्रारम्भविषये, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्ये केन्द्रीयविश्वविद्यालयत्व विषये, संस्कृत डिजिटलइंडिया-स्किलइण्डिया-इत्यादिभि: सह संयोजनसन्दर्भे, अखिलभारतीयसंस्कृतशिक्षावोर्ड इत्यस्य गठनस्य

शेषभाग:सप्तमपुटे

# ऐषमः राष्ट्रपति-प्रमाणपत्रेण सभाजितेषु अन्यतमेन संस्कृत-कवि-विदुषा प्रो.हरिदत्त-शर्मणा साकं आकाशवाण्याः साक्षात्सम्भाषणम्...

बलदेवानन्द-सागरः
[ महासचिवः, भा.सं.प.संघः ]



'भारतस्य महामहिमशालिना राष्ट्रपतिना प्रमाण-पत्रप्रदानेन सभाजितेषु संस्कृत-विद्वत्सु अन्यतमेन आचार्येण हरिदत्त-शर्मणा साकं 'संस्कृत-सौरभम्'-इति आकाशवाण्याः कार्यक्रमार्थं साक्षात्सम्भाषणं ध्वन्यङ्कितम् । अवसरेऽस्मिन् कार्यक्रम-सञ्चालकेन डो.बलदेवानन्द-सागरेण पृष्टः आचार्य-शर्मा स्वीयान् नाना अध्यापनानुभवान् विवर्णयन् स्वीय-वैदेशिक-यात्राविषयेऽपि विस्तरेण सूचितवान् । तेनोक्तं यत् संस्कृत-शिक्षणार्थं तेन नैकवारं अनेकेषां देशानां यात्रा विहिता । तदवसरे तेन अनुभूतं यत् अनेकेषु देशेषु प्रतिष्ठापितैः संस्कृत-पीठैः संस्कृत-विषयकं बहुविधं शोधकार्यम् अनुष्ठीयते । प्रो.शेल्डोन-पोलोक-विषये पृष्टः डो.शर्मा न्यगादीत् यत् अमुना वैदेशिक-विदुषा नैकत्र संस्कृत-ज्ञानस्य वैदिक-मनीषायाश्च विद्रूपीकरणं विहितम् । तच्च नैवास्ति समीचीनम् । भारतीयैः विद्वद्भिः स्वीय-रचनात्मक-प्रतिभया तत् सर्वं सम्यक्तया सम्पादनीयमवशिष्यते। साक्षात्कार-सम्भाषणावसरे आचार्य-शर्मणा स्वीय-काव्यपाठेन सहृदयानां परितोषार्थं काव्यरस-परिवेषणम् अनुष्ठितम् । प्रतिमासं द्विवारं [ प्रथमे तृतीये च शनिवासरे ] रात्रौ सार्धनववादने आकाशवाण्याः इन्द्रप्रस्थ-वाहिनीतः [ 666 KHz-तः ] प्रसार्यमाणोऽयं कार्यक्रमः एप्रिल-मासे द्वितीय-दिनाङ्के [ शनिवासरे ] श्रोतुं शक्यते । ....

## प्रथमपुटस्य शेषभागः साहित्योत्सवे संस्कृतप्रतिभागिता...

साहित्योत्सवः आयोज्यते। अस्मिन् वर्षे अयमुत्सवः फरवरी 14 दिनाङ्कात् 20 दिनाङ्कं यावत्प्रचलितः। संस्कृतभाषायाम् ऐषमः कानपुरवास्तव्यः कविवरः रामशङ्कर अवस्थी महोदयः(1942) तस्य सहस्रपुटात्मकाय वनदेवीमहाकाव्याय

साहित्येकादमीप्रशस्त्या सभाजित इति तमभिनन्दामो वयम्। महाकाव्यमिदं रामायणीयं सीताचरितं पुष्कलीकरोति स्वीयमनवद्याभिव्यक्त्या समसामयिकनारीचेतनया नवनववचोविच्छित्त्या भङ्गिभणित्या च। एतदतिरिच्य महाकवेरस्य आहुतिः स्वातन्त्र्ययज्ञे, चिद्विलासः, कारगिलयुद्धम्, दामिनीपर्यस्फुरत्, रात्रिर्गमिष्यति, अजीजनवाई, विक्रमादित्यदायादाः, यामिनी यास्यति, हिमाद्रिशतकम्, सुदर्शनचरितम्, विश्वामित्रम्, सीतावनवासः इत्यादयो ग्रन्थाः प्रसिद्ध्यन्ति। फरवरीमासस्य षोडशदिनाङ्के सायं पञ्चवादने कविरयम् अकादेम्याः अध्यक्षमहोदयेन विश्वनाथतिवारिणा

सत्कृतः, नवदेहल्याः फिक्कीसभागारे आयोजिते सामूहिके भव्यसमारोहे सम्मानितः। अङ्कवस्त्रेण अकादेमीस्मारकेण च सह एकलक्षरूप्यकेण कविः सभाजितः। अनेन अग्रेपि तस्य लेखनी अप्रतिहतगत्या प्रसरतु इति कामयामहे। एतदङ्गतया आयोजिते युवसाहिती-कार्यक्रमे कलिकातावास्तव्यो नारायणदाशः युववर्गस्य प्रतिनिधित्वं वोढ्वा कविसम्मेलने स्वीयैः गज़ल-हायकू-आधुनिककाव्यैश्च सहृदयान् रसाप्लुतान् अकरोत्। पूर्वोत्तरीकार्यक्रमे चन्द्रभूषणझावर्यः स्वकाव्यपाठेन सहृदयान् सम्मोहितवान्।

## प्रथमपुटस्य शेषभागः पाटणनगरे ऐषमः श्रीहेमचन्द्र-समारोहः....

काव्यनुशासनमधिकृत्य तत्रस्थितानि सिद्धान्तानि विवृतानि, तेषु यत् मौलिकं चिन्तनं दृश्यते, तत्सर्वं सूक्ष्मेक्षिकया सरलया संस्कृतभाषया समुद्घाटितम् । एवं डॉ. सदाशिवकुमारैः प्रथमं स्वकीयं बीजभूतं व्याख्यानं प्रदत्तम् ।तदनन्तरं मुम्बईतः समागताः डॉ. कुलकर्णिमहोदयाः हेमचन्द्रस्य सिद्धहेम-शब्दानुशासनस्य पाणिनेश्चाष्टाध्याय्याः च समग्रायाः विषयव्यवस्थायाः तुलनात्मकं मूल्याङ्कनं संस्कृतमाश्रित्य प्रस्तुतवन्तः । अनयो-र्व्याकरणयोर्मध्ये ये ये विशेषाः सन्ति तानपि सुचारु प्रकटितवन्तः । अत्र विलसितं साम्यमपि तैः सुस्पष्टीकृतम् ।।

अस्मिन् राष्ट्रियपरिसंवादे स्वर्गीय-प्रॉ. श्रीतपस्वी-नान्दी-स्मृतिव्याख्यानमपि समायोजितमासीत् । तेन साकं, प्रो. श्रीमणिभाई-प्रजापति-व्याख्यानं प्रदानाय डॉ. कुलकर्णीमहोदयाः समाहूताः, तैः संगणक-यन्त्रेण कथं भारतीयभाषाणामनुवादं कर्तुं शक्यते, एवमेव, तत्र संस्कृतव्याकरणशास्त्रं कथमुपयुक्तं भवेदिति सोदाहरणं प्रदर्शितम् । तत्र डॉ. वसन्तकुमार-भट्टेन अभिज्ञानशाकुन्तलस्य पञ्च-रंगावृत्तयः इति विषयमवलम्ब्य तत् व्याख्यानं प्रदत्तम् । अस्मिन् निरूपणे तैरुक्तं यत् काश्मीरी-मैथिली-बंगाली-दाक्षिणात्य-देवनागरीत्यादि वाचनापञ्चकं वस्तुतस्तु रंगकर्मिणां मंचोपरि विहितानां परिवर्तनानामेव विलासवैविध्यं प्रकटीकरोति । अस्य नाटकस्य सर्वेषां पद्यानां विश्लेषणमप्यत्रेदं प्रथमतया समुपस्थापितम् । येन ज्ञायते यत् सत्स्वपि बहुविधेषु परिवर्तनेषु केन कारणेनानिकालात् नाटकस्यास्याकर्षणम् अक्षुण्णं वरीवर्तते । एतच्च व्याख्यानं पुस्तिकारूपेणापि प्रकाशितम् वर्तते ।

आस्यां गोष्ठ्यां सार्धद्विशतसंख्याकाः शोधालेखाः प्रस्तुताः । गतवर्षीयाणां च शोधालेखानां संकलनं कृत्वा, तेषां समेषां हैम-प्रपाख्यायां पत्रिकायां प्रकाशनमपि अस्मिन् वर्षे संस्कृतविभागेन विहितम् । आगामिनि वर्षे अपि एवमेवास्मिन् वर्षे प्रस्तुतानाम् शोधालेखानाम् प्रकाशनम् भविष्यति ।

प्रसंगेऽस्मिन् सर्वैः भाग-ग्रहितृभिः संस्कृताध्यापकैः हेमचन्द्र-जैन-ज्ञान-मन्दिरम् गत्वा प्राचीनाः महत्वपूर्णाः हस्तलिखिताः ग्रन्थाः अवलोकिताः । तान् दर्शं दर्शं प्रसन्नवदनाः प्राध्यापकाः एतेषामुद्धाराय प्रेरिताः संजाताः । अस्य हेमचन्द्रसमारोहस्य पञ्चदशपूर्वेभ्यो प्राक् प्रवर्तनम् कृतमासीत्, तच्च नैरन्तर्येण अद्यापि प्रतिवर्षं प्रचलतितराम् । सकलस्यापि समारोहस्य प्रो. देवसिंह राठवा-महोदयश्च, प्रो. दिलीपकुमार पटेल-महोदयश्च, डॉ. सनतकुमार जोशी-महोदयश्च संमील्य सुचारुरूपेण संचालनमुपसंहरणञ्च कृतवन्तः ।।

## प्रथमपुटस्य शेषभागः दिल्लीसंस्कृताकादम्या त्रिदिवसीय......

च मान्यतार्थं डॉ.गोस्वामीगिरधरीलालप्राच्यविद्याप्रतिशनमधिकृतं



भवेदिति । यस्य च समर्थनं असमसंस्कृतविश्वविद्यालयस्य कुलपतिभिः प्रो.दीपकशर्ममहोदयेन, कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य कुलपतिभिः प्रो.




उमावैद्यमहोदया, महर्षिपाणिनिविश्वविद्यालयस्य कुलपतिभिः प्रो.रमेशचन्दपण्डामहोदयेन, उत्तराखण्डसंस्कृतविश्वविद्यालयस्य



कुलपतिभिः प्रो.पीयूज़कान्तदीक्षितमहोदयेन, द्वितीयसंस्कृतायोगस्य पूर्वाध्यक्षैः प्रो.सत्यव्रतशास्त्रीमहोदयेन च स्वकीये वक्तव्ये सम्पूर्ण समर्थनं कृतम् । अस्मिन् अवसरे कार्यक्रमस्याध्यक्षतां कुर्वन् दिल्लीसर्वकारस्य भाषाविभागस्य सचिवेन श्रीरमेशतिवारीमहोदयेन कथितं यत् दिल्लीसर्वकारेण संस्कृतगुरुकुलानां एवं विद्यालयानां मान्यतायाः दिशायां प्रक्रिया प्रारब्धा ।

# शिक्षकः सामाजिकचेतनायाः प्रतीकः -प्रो.गणेशदत्तशर्मा

दिनेशशर्मा

नवदेहली । मनुष्यस्य संस्कारीकरणं शिक्षकेन एव क्रियते । शिक्षकः सामाजिकचेतनायाः प्रतीकः । सम्प्रति शिक्षायाः क्षेत्रे



नैकविधानि परिवर्तनानि आयान्ति । शिक्षायाः मूलभूतपरिवर्तने तत्कार्यं प्रयासं वा दिल्लीसंस्कृताकादम्या क्रियते । विचारोऽयं संस्कृतछात्राध्यापकप्रशिक्षणकार्यशालायां मुख्यतिथिभिः दिल्लीसंस्कृताकादम्याः उपाध्यक्षैः प्रो.गणेशदत्तशर्मणा प्रतिपादितः



। तैः कथितं यत् अकादम्या संस्कृतशिक्षकाणां कृते शिक्षणस्य क्षेत्रे सर्वाणि महत्पूर्णानि तत्वानि शिक्षितानि । अकादम्याः प्रयासोऽयं वर्तते यत् संस्कृतस्याध्यापकाः आधुनिकपरिवेशे शिक्षणकार्येषु अग्रसराः भवेयुः । छात्राणां शिक्षायै सर्वासामाधुनिकविधीनां प्रयोगः कुर्युरिति ।

अस्मिन्नवसरे अकादम्याः सचिवैः डॉ.जीतरामभट्टमहोदयैः कथितं यत् शिक्षकः राष्ट्रस्य समाजस्य च निर्माणे महत्वपूर्णायाः भूमिकायाः निर्वहणं कुर्वन्ति । दिल्लीसंस्कृताकादम्या समायोजिते अस्मिन् संस्कृतशिक्षणकार्यशालायां देहल्याः विभिन्नविश्वविद्यालयेभ्यः शिक्षाशास्त्रीकुर्वाणः प्रतिभागिनः भागं गृहीतवन्तः । अवसरेऽस्मिन् दिल्लीसर्वकारस्य लेखानियन्त्रयकविभागस्य नियन्त्रकैः श्रीडी.एस.भाकुनीमहोदयैः कथितं यत् भवन्तः भविष्यस्य शिक्षकाः सन्ति ये अध्यापनेन राष्ट्रसेवायां स्वकीयं योगदानं प्रदानं करिष्यन्ति । संस्कृतछात्राध्यापकाः प्रो. चान्दकिरणसलूजा-डॉ.रामकरणडवास-श्रीलक्ष्मीनरसिंहादिभिः दिवसद्वयात्मके कार्यक्रमे प्रशिक्षिताः । अस्मिन्नवसरे नैके गणमान्यजनाः उपस्थिताः आसन् ।

## २०१५वर्षस्य राष्ट्रपतिसम्मानप्राप्तकर्तॄणां संक्षिप्तपरिचयः (२)

### प्रो.लक्ष्मीश्वरझा



प्रो.लक्ष्मीश्वरझामहोदयानां जन्म 1948तमे वर्षे जूनमासस्य पञ्चमे दिनांके मिथिलाक्षेत्रे केवटाग्रामे मधुवनीजनपदे बिहारराज्येऽभवत् । ग्रामादेव विद्यालयीयशिक्षां सम्प्राप्य तैः देहलीस्थ-श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठतः शास्त्री आचार्यः तथा च प्रथमश्रेण्यां शिक्षाशास्त्री इत्युपाधयः उत्तीर्णाः । तत्पश्चात् देहलीविश्वविद्यालयतः स्नातकोत्तर-एफ.फिल.-पीएच.डी इत्युपाधयः उत्तीर्णाः । प्रायशः चतुर्पञ्चाशत् वर्षाणां सुदीर्घकालं यावत् भवद्भिः श्रीलालबहादुरष्ठास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य व्याख्याता, प्रवाचकः, आचार्यः, संकायप्रमुखः तथा च प्रभारीकुलपतिपदं निर्वाहितम् । भवद्भिः विविधानां ग्रन्थानां प्रणयनं कृतम् तेषु कात्यायनश्रौतसूत्रम्(भागत्रयम्), वेदों का मौलिक स्वरूप, यज्ञमधुसूदनादयः प्रमुखाः सन्ति । भवतां विशेषज्ञता वेदेषु वेदविज्ञानस्य च क्षेत्रे वर्तते । भवद्भिः देशे विदेशे च विभिन्नसंगोष्ठिसु सम्मेलनेषु सहभागितां कृत्वा शोधपत्राणि प्रस्तुतानि । विविधविश्वविद्यालयेभ्यः विभिन्नरूपे सम्बद्धाः आसन् । विविधसंस्थाभिः सम्मानिताः । संस्कृतभाषायाः प्रोन्नयने सम्प्रत्यपि सक्रियाः सन्ति ।

आवाससंकेतः
एच-7, धर्मपुरा, नफजगढ, नई दिल्ली-110043

## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

खादी वस्त्र ही नहीं, विचार है !
आदर्श ग्रामोद्योग समिति, दिल्ली
खादी वस्त्रों का विशाल भण्डार
✪ सूती खादी व रेडीमेड ✪ ऊनी खादी व कम्बल (रेडीमेड) ✪ रेशम साड़ी (रिल्ड)
✪ रेशम स्पन व रेडीमेड ✪ पोली खादी
सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद,अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।
खादी ग्रामोद्योग भवन
✪ 10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, (उ० प्र०)
✪ शेरपुर चौक, करावल नगर, दिल्ली-110094
फोन:-0120-2631855, 9899334204

## राष्ट्रिय-संस्कृत-संस्थानम्

(मानित-विश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए'- श्रेण्या प्रत्यायितम्

56-57, इन्स्टीट्यूशनल्-एरिया, जनकपुरी, नवदेहली-110058

दूरभाष -011-28520977, 28521994, 28524993, 28524995

### योजनायाः अन्तर्गते वित्तीयसहायतार्थम् अधिसूचना

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयस्य तत्त्वावधाने नवदेहलीस्थेन राष्ट्रियसंस्कृतसंस्थानेन 2007 तमवर्षीयायाः संस्कृतविकासपुनरीक्षितयोजनायाः अन्तर्गततया अधोनिर्दिष्टेभ्यः कार्येभ्यः 2016-2017 तमवर्षस्य विश्रीयसहायतानुदानं निमित्तीकृत्य पूर्वनिर्धारितप्रपत्रानुगुणम् आवेदनपत्राणि निमन्त्र्यन्ते-

1. संस्कृतशिक्षणाय वित्तीयसहायता -
   (क) पारम्परिकसंस्कृतपाठशालासु, विद्यालयेषु, महाविद्यालयेषु च संस्कृताध्यापकेभ्यः वेतनानुदानम् ।
   (ख) पारम्परिकसंस्कृतपाठशालासु, विद्यालयेषु, महाविद्यालयेषु च आधुनिकविषयाध्यापकेभ्यः वेतनानुदानम् ।
   (ग) राज्यसर्वकारसम्बद्धेषु माध्यमिकविद्यालयेषु उच्चतरविद्यालयेषु च संस्कृताध्यापकेभ्यः वेतनानुदानम् ।
2. देशे अभावग्रस्तपरिस्थितौ स्थितेभ्यः प्रसिद्धसंस्कृतपण्डितेभ्यः, अध्यापकेभ्यश्च सम्मानराश्यनुदानम् ।
3. सर्वकारेतरसङ्घटनेभ्यः, मानितसंस्कृतविश्वविद्यालयेभ्यः, विभिन्नशोधपरियोजनाभिः कार्यक्रमैः वा युक्तेभ्यः विश्वविद्यालयेभ्यः, संस्कृतसंवर्धनगतिविधिभ्यश्च वित्तीयसहायतानुदानम् ।
4. संस्कृतस्य दुर्लभपुस्तकानां पुनर्मुद्रणाय प्रकाशनाय संस्कृतपुस्तकानां नैकप्रतिकृतिक्रयणाय च वित्तीयसहायतानुदानम् ।
5. सेवानिवृत्तानां, प्रसिद्धसंस्कृतविदुषां (शास्त्रचूडामणीनां) सेवायाः उपयोगाय वित्तीयसहायतानुदानम् ।
6. पारम्परिकसंस्कृतपाठशालासु/संस्थासु च विद्यमानानां छात्राणां व्यावसायिकप्रशिक्षणकार्यक्रमार्थं पञ्जीकृतशैक्षिकसङ्घटनादिभ्यः वित्तीयसहायतानुदानम् ।
7. संस्कृतशिक्षणस्य मानकानां सम्पोषणाय विश्वविद्यालयेभ्यः मानितविश्वविद्यालयेभ्यः सी.बी.एस.ई /एन.सी.ई.आर.टी./ एस.सी.ई.आर.टी प्रभृतिभ्यः च वित्तीयानुदानम्।

अधिसूचनायाः तिथिः - 5.4.2016

आवेदनपत्रसमर्पणाय अन्तिमा तिथिः - 15.5.2016

नियमविवरणम् आवेदनपत्राणि च संस्थानस्य जालपुटे (www.sanskrit.nic.in) द्रष्टुं शक्नुवन्ति।

कुलसचिवः

## पाठकानां कृते सूचनाः-

कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- (संस्थादीनां कृते) द्विवार्षिकशुल्क रु. २४०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-

**Sanskrit samvad,**
**Current A/C No. 224902000000142,**
**Indian Overseas Bank, Yamuna Vihar, Delhi-110053**
**IFC Code- IOBA0002249**

G.C. ENTERPRISES
GOVT. CONTRACTOR
Prop. TARLOK PAPNEJA
SPECIALIST IN WATER TREATMENT
C-3/153, Yamuna Vihar, Delhi - 53
Phone : 22911281, 22919451

# सम्पादकीयम्

## कर्मफलस्य अनिवार्यता, प्रायश्चितस्य च प्रक्रिया

कर्मणः फलमनिवार्यं विद्यते । समस्तजगतः व्यवस्था कर्मफलाधारेणैव तिष्ठति । यादृशं कुरुते कर्म तादृशं फलमश्नुते इति श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन कथितम् । ईश्वरः सम्यक् न्यायकर्तारूपेण वर्तते । न्यायस्य इदमेव तात्पर्यं वर्तते यत् दुष्टानां कृते सम्यक् दण्डविधानं स्यात् कश्चित् । पूजनार्चनवन्दनकर्तृणां च कृते तेषां दुष्कर्माणां फलस्वरूपं दण्डविधानं न्यूनता अल्पता वा स्यादिति कथं न्यायं संगतम् । तादृशानां कुटिलानां कृते दण्डविधाने पक्षपातं न स्यादिति । भ्रातृणां कृते मित्राणां वा कृते अधिकारिणामेतदेव पक्षपातो दृश्यते । ईश्वरेणापि चेत् एवमेव क्रियते तदा न्यायस्य अस्तित्वमेव किं भविष्यति ।

पापकर्मणां परिहारस्योपायं कृत्वा तस्य दण्डविधानात् आत्मानं परिरक्षणार्थमुपायं कुर्वन्ति तेषां कृते सम्यक् मार्गः प्रायश्चितमेव वर्तते । स्वेच्छापूर्वकं तस्य दण्डग्रहणं कृत्वा अस्मिन् एव जीवने पापकर्मणां प्रायश्चितं करणीयम् । अनेन च प्रायश्चितकर्मणा आत्मनः शुद्धिर्भवति । मनसः सन्तापं विनश्यति । चित्तस्य निर्मलता जायते । अन्तःकरणं शान्तं भवति । समाजे अपि पुनः प्रतिष्ठा प्राप्यते । विगतं च विश्वासः सम्मानं च पुनरायाति । न्यायालये यदि कश्चिद् स्वयमेव पापानां कृते स्वेच्छया स्वीकरणं करोति तदेव तस्य प्रायश्चितस्य मार्गं प्रशस्तं भवति । एषा एव प्रायश्चितस्य प्रक्रिया ।




ओ३म्
भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण
(द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)
सत्य के प्रचारार्थ
सत्यार्थ प्रकाश
सत्य के प्रचारार्थ

| | | |
|---|---|---|
| • प्रचार संस्करण (अजिल्द) 23×36÷16 | मुद्रित मूल्य 50 रु. प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| • विशेष संस्करण (सजिल्द) 23×36÷16 | मुद्रित मूल्य 80 रु. प्रचारार्थ 50 रु. | |
| • स्थूलाक्षर सजिल्द 20×30÷8 | मुद्रित मूल्य 150 रु. | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन
कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति **सत्यार्थ प्रकाश** के प्रचार प्रसार में सहभागी बनें
आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

# भारतीयसंवत्सरज्ञानम्

-ज्ञानेश्वरशर्मा

**चैत्रमासि जगद् ब्रह्मा ससर्ज प्रथमोऽहनि।**
**शुक्लपक्षे समग्रं वै तदा सूर्योदये सति।**
**वत्सरादौ वसन्तादौ बलिराज्ये तथैव च,**
**पूर्वाविद्धैव कर्तव्या प्रतिपत् सर्वदा बुधैः।**

इत्ययेन वचनेन प्रचलितईस्वीसन् नववर्षारम्भसिद्धान्तस्य अवैदिकत्वमनौचित्यञ्च सिद्ध्यति। किञ्च भास्कराचार्येणापि उक्तम्-

**लङ्कानगर्यामुदयाच्च भानोस्तस्यैव वारे प्रथमं बभूव।**
**मधोः सितादेः दिनमासवर्षयुगादिकानां युगपत् प्रवृत्तिः॥**

अतो प्रचलितश्चैत्रशुक्लप्रतिपदि एव नव-वत्सरस्याऽऽरम्भः भवति। इत्थमार्यभट्टेनाऽपि स्वीवकृतम्-

**युगवर्षमासादिवसाः समं प्रवृत्तास्तु चैत्रशुक्लादेः।**
**कालोऽयमनाद्यन्तो ग्रहभैरनुमीयते क्षेत्रे।**

इदं संवत्सरज्ञानं सकलश्रौत-स्मार्तधर्मवकृत्यार्थमावश्यकं भवति। उद्धरणान्यपि प्राप्यन्ते सोमयागविषये:-"संवत्सरे संवत्सरे सोमयाजी" किञ्च अश्वमेघविषये च "संवत्सरमाहुतिः जुहोति"।

पुनश्च कात्यायन श्रौतसूत्रे - "पशिव्ज्या संवत्सरे संवत्सरे प्रावृषि"।

आवृत्तिरतः संवत्सरम् - "इत्यादयः विविधाः प्रमाणाः संवत्सरज्ञानविज्ञये दृश्यन्ते। वेदाङ्गज्योतिषे लगधमुनिना प्रोक्तं यत्-

**वेदाहि यज्ञार्थमभिप्रवृत्ताः, कालानुपूर्वाविहिताश्च यज्ञाः।**

ऋग्-यजु-साम-अथर्ववेदरूपाः मन्त्रब्रह्मणात्मका वेदा हि विविधानां यज्ञानां प्रतिपादनाय प्रवृत्ताः सन्ति, यज्ञाश्च वेदेषु कालक्रमानुसारं विहिताः सन्ति। एतस्मादेव कालानुपूर्व्यज्ञाविधानानुशासने अस्य नूतन संवत्सरस्य ज्ञानं दृश्यताम्। संवत्सरेऽस्मिन् वर्तमानकल्पारम्भतः ससन्धयः षण्णमनवो व्यतीताः, वर्तमाने वैवस्वतमनुः वर्तते, तस्यापि प्रवृत्तस्य सप्तविंशतिमितानि महायुगानि व्यतीतानि, अतोऽष्टविंशतितमे युगे, त्रयो युगचरणाः गताः (सत्-त्रेता-द्वापरेति) चतुर्थे चरणे कलेराराम्भतो षोडशोत्तरैकपञ्चाशत वर्षाणि व्यतीतानि। अतो गुरूमानेन वर्षादौ "सौम्य" संवत्सर भविता। किञ्च वर्षेऽस्मिन् राजा शुक्रः, मन्त्रीबुधः, मेघेशोऽपि बुधः, सस्येशो शनिः, रसेशो चन्द्रः, नीरसेशः शनिः वर्तते। एतेषां सर्वेषां संवत्सरफलमपि विमृश्यते।

**संवत्सर- सौम्यः**
**जायन्ते सर्व धान्यानि स्वस्थं च निरुपद्रवम्।**
**सौम्य वृष्टि वरारोहे सौम्ये सौम्यं प्रजायते॥**

**राजा- शुक्रः**
**शुक्रस्य राज्ये बहुसस्य संकुला प्रभूततोयाम्बुधरा धरित्री।**
**फलन्ति वृक्षा बहुगोप्रसूति वसुन्धरा पार्थिव सौख्य संयुता॥**

**मन्त्री- बुधः**
**विविध धान्ययुता खलु मेदिनी प्रचुर तोयधना मुदिता जनाः।**
**नृपतयो जनपालनतत्परा सुरगुरौ ननु मन्त्रि समागते॥**

**मेघेश- बुधः**
**अमृतरश्मिसुते यदि वारिपे बहुजलं तुषधान्यरसादिकम्।**
**द्विजवरा यजनोत्सुक चेतसो विविधं सौख्य युता धरणी तदा॥**

**पूर्वधान्येश ( सस्येश )- शनिः**
**रवि सुते यदि धान्य पतौ जनो नृपतिभिः परिपीडितविग्रहः।**
**गदभयं तुषधान्यहरं सदा दुरित वाद विवाद युता नराः॥**

**रसेश- चन्द्रः**
**यदि विधौ रसपे भुविमानवो नव नवां युवति बुभुजे प्रियाम्।**
**जलधरा बहुवारि विधायका रसवती धनधान्यवती मही॥**

**नीरसेश- शनिः**
**त्रपु पिण्डादि लोहानां कृष्ण वस्त्रादि वस्तुनाम्। अर्घवृद्धिः प्रजायेत् मन्दे नीरस नायके॥**

## "पाक्षिकपञ्चाङ्गम्"

- ज्योतिषाचार्यः सुरेन्द्रकुमार

**वि.संवत् २०७३, शाके १९३८, चैत्रशुक्लपक्षः (दिनांकः ०८ अप्रैलतः २२ अप्रैलः २०१६ पर्यन्तम्) उत्तरायणम्, उत्तरगोलः, वसन्त/ग्रीष्मऋतुः, अयनांशः २४/०५'/००"**

| दि. | वासरः | तिथिः | समाप्ति-कालः | | नक्षत्रम् | समाप्ति-कालः | | चन्द्र-संचारः | व्रत-पर्वोत्सवाः मुहूर्त्तांश्च |
|---|---|---|---|---|---|---|---|---|---|
| टप्रै | | | घ. | मि. | | घ. | मि. | | - |
| ०८ | शुक्रः | प्रतिपदा | १३ | ०६ | अश्वनी | २३ | २२ | मेषः | सौम्यनामकः वि. सं. २०७३ प्रा. चैत्र नवरात्रे प्रा. |
| ०९ | शनिः | द्वितीया<br>तृतीया | ०९<br>२९ | २३<br>५६ | भरणी | २० | ३४ | वृषः<br>२५/५५ | गणगौरी तृतीया, श्रीमत्स्यजयन्ती,झूलेलालजयन्ती, |
| १० | रविः | चतुर्थी | २६ | ५४ | कृतिका | १८ | ०७ | वृषः | भद्रा २५/३८ वादनतः ५१/५३ पर्यन्तम्, दमनकचतुर्थी |
| ११ | सोमः | पञ्चमी | २४ | २७ | रोहिणी | १६ | ११ | मिथुनः<br>२७/२८ | रोहिणीव्रतः, श्री ( लक्ष्मी ) पञ्चमी,नाग- पञ्चमी, स.सि.यो. |
| १२ | भौमः | षष्ठी | २२ | ४१ | मृगशिरा | १४ | ५४ | मिथुनः | स्कन्धषष्ठीव्रतः, सूर्यषष्ठीव्रतः, यमुनाछठः |
| १३ | बुधः | सप्तमी | २१ | ४१ | आर्द्रा | १४ | २२ | मिथुनः | भद्राः ३८/५८ प्रारम्भः, सूर्य अश्विनी, मेषसंक्रान्ति |
| १४ | गुरुः | अष्टमी | २१ | २९ | पुन. | १४ | ३६ | कर्कः<br>०८/२८ | भद्राः ०८/४४ पर्यन्तम्, श्रीदुर्गाष्टमी, स.सि.यो. |
| १५ | शुक्रः | नवमी | २२ | ०३ | पुष्य | १७ | १७ | कर्कः | श्रीरामनवमी, रामायणसप्ताहसमाप्तः, हिमाचलदिवसः, मनसादेवीमेलाः |
| १६ | शनिः | दशमी | २३ | १८ | आश्लेषा | १७ | १७ | सिंहः<br>१७/१७ | नवरात्र-पारणा, गण्डमूलविचारः, |
| १७ | रविः | एकादशी | २५ | ०७ | मघा | १९ | ३३ | सिंहः | भद्रा १५/२६ वादनतः ४७/४३ पर्यन्तम्, कामदा-एकादशीव्रतः, |
| १८ | सोमः | द्वादशी | २७ | १९ | पूर्वाफा. | २२ | १३ | कन्या<br>२८/५६ | गुरू अङ्गददेवजयन्ती, श्रीदमनोत्सवः, |
| १९ | भौमः | त्रयोदशी | २९ | ४७ | उत्तराफा. | २५ | १० | कन्या | भौमप्रदोषव्रतः, श्रीमहावीरजयन्ती, अनङ्गत्रयोदशी |
| २० | बुधः | चतुर्दशी | ०० | ०० | हस्तः | २८ | १४ | कन्या | बुधकृतिकानक्षत्रे ५७/१८, शिवदमनोत्सवः,स.सि.यो. |
| २१ | गुरुः | चतुर्दशी | ०८ | २० | चित्रा | - | - | तुला<br>२९/३३ | भद्रा ०५/५८ वादनतः ३९/११ पर्यन्तम्, श्रीसत्यनारायणव्रतः, शकवैशाखप्रारम्भः, |
| २२ | शुक्रः | पूर्णिमा | १० | ५४ | चित्रा | ०७ | १९ | तुला | चैत्रपूर्णिमा, श्रीहनुमानजयन्ती ( दक्षिणात्य ), औलीजैनसमाप्तः। |

# त्रिदिवसीय-अखिलभारतीयसंस्कृतसम्मेलनस्य भव्यं समापनम्

नवदेहली । दिल्लीसंस्कृताकादम्या मार्चमासे समायोजितस्य त्रिदिवसीय-अखिलभारतीयसम्मेलनस्य आयोजनं तथा च



समापनकार्यक्रमः अतीव भव्यः आसीत् । समापनसत्रे मुख्यातिथित्वेन सुप्रसिद्धाः संस्कृतविद्वांसः प्रो. रामकृष्णशर्ममहाभागाः तथा च अध्यक्षत्वेन उत्तराखण्डसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतयः प्रो. महावीरअग्रवालमहोदयाः उपस्थिताः आसन् । कार्यक्रमस्यारम्भः सरस्वतीवन्दनया अभवत् । अस्मिन् अवसरे संस्कृताकादम्या सचिवेन डॉ.जीतरामभट्टमहोदयेन सम्मेलनस्य विषये सविस्तारं प्रतिपादितं यत् अत्र 447प्रतिभागिभिः विभिन्नविषयेषु शोध पत्राणि पठितानि ।

अस्मिन्नवसरे मुख्यातिथिभिः प्रो.रामकरणशर्ममहोदयेन कथितं यत् संस्कृतभाषायां संस्काराणां परम्परा वर्तते । संस्कृतस्य कार्यं संस्कृतभाषायामेव भवेदिति । तैः युवावर्गः आह्वाहितः यत् संस्कृतं भारतीया संस्कृतिश्च अतीव समृद्धा वर्तते अस्य दायित्वमिदानीं तेषामेव वर्तते यत् अस्याः परम्परायाः सम्वध








नं भवेदिति । अस्मिन् अवसरे जाकिरहुसैनमहाविद्यालयस्य प्राचार्यमहोदयेन डॉ.मशरूरअहमदवेगमहोदयेन कथितं यत् संस्कृतं धरातलस्य समृद्धा भाषा वर्तते । अस्याः व्यवसायिकरणमावष्ठयकं वर्तते । तैः कथितं यत् अस्यां दिशायां जाकिरहुसैनमहाविद्यालये अनुवादस्य कार्यशालानामारम्भः अभवत् ।

अस्मिन् सत्रे उत्तराखण्डसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतिभिः कार्यक्रमस्य अध्यक्षैः प्रो. महावीरअग्रवालमहोदयैः कथितं यत् संस्कृतस्य सम्वर्धने एतादृशानां भव्यसम्मेलनानां माध्यमेन संस्कृतविदुषां एकस्मिन्नेव मञ्चे संस्कृतशोधस्य परिचयः आवश्यकः । तैः कथितं यत् युवावर्गस्य उत्साहं दृष्ट्वा संस्कृतस्य स्वर्णिमयुगस्य संकेताः प्राप्यन्ते । कार्यक्रमस्यान्ते अकादम्याः उपाध्यक्षैः प्रो. गणेशदत्तशर्मामहोदयेन सम्मेलनेऽस्मिन् समुपस्थितानां प्रतिभागीनां विदुषां गणमान्यजनानां च धन्यवादं विज्ञापितम्।

# संस्कृत कविसमवाये जातः काव्यपाठः

नवदेहली 31.03.2016। दिल्लीसंस्कृत-अकादम्या आयोजितस्य त्रिदिवसीयस्य अखिलभारतीयसंस्कृतसम्मेलनस्य समापनोपरान्तं काव्यपाठोऽपि जातः। अस्मिन् अध्यक्षः श्रीलालबहादुर शास्त्री राष्ट्रीय संस्कृत विद्यापीठस्य पूर्वकुलपतिः श्रीधरवासिष्ठः, मुख्यातिथिः उत्तराखण्डसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतिः प्रो. मोहनचन्द्र बलौदी, सारस्वतअतिथिश्च पद्मश्रीविभूषितः सुकविः डॉ. रमाकान्तशुक्लः उपस्थिता आसन्। डॉ. राजकुमार मिश्रः गङ्गाविषयिणीं कवितां प्रास्तौत्, विष्णुदत्ततिवारी गीतगोविन्दात्, डॉ. कौशलतिवारी हाइकूकाव्यं, डॉ. विनीता रायः नीतिपद्यं, विकासकुमार उपाध्यायः देशभक्तिभरितपद्यानि, सर्वेशशाण्डिल्यः स्तोत्रपद्यानि, अरुणनिषादः गलज्जलिकां, युवराजो भट्टराई मित्रविषयिणीं कवितां, अनिरुद्धः अवस्थी वर्तमानपरिस्थितिमधिकृत्य, संगीता आर्या सज्जनमहिमानमधिकृत्य, डॉ. नौनिहालगौतमः उज्जयिनीमधिकृत्य पद्यानि प्रास्तौत्। अस्मिन् समवाये शिवकुमारशुक्लः वेदप्रकाशशर्मा, डॉ. सुदेश आहुजा चेत्यादय उपस्थिता आसन्।













प्रेरयति, कर्णान् भद्रश्रवणाय आदिशति, आत्मानम् आत्मबलेन तर्पयति, प्रजाः सद्गुणैः परिपूरयति, पशुभ्यः पुष्टिं प्रयच्छति, परिवारस्य समाजस्य च सदस्यान् पारस्परिकसौहार्दार्थम् उपदिशति-

**'मनो मे तर्पयत वाचं मे तर्पयत प्राणं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयतात्मानं मे तर्पयत प्रजां मे तर्पयत पशुन्मे तर्पयत गणान्मे तर्पयत गणा मे मा वितृषन्॥'**[७५]

एवं प्रकारेण वेदेषु स्त्रियः महत्त्वं स्थाने स्थाने क्वचिद् सरस्वती उषा आपः इत्यादिभिः नाम्नैः ख्यातम् अस्ति। वेदस्य स्त्री समाजस्य शिक्षिका अस्ति, सा युद्धक्षेत्रे शत्रून् न केवलं पराजयते एव अपितु वीरान् युद्धाय प्रेरयत्यपि। न्यायासनं समुपस्थिता सा न्यायं विधत्ते, गृहे सा परिवारपालनं करोति सा समाजे स्वकृतकर्मभिः उषावत् प्रकाशते, सा वीरसन्ततिं प्रसूते यया राष्ट्ररक्षा जायते, सा स्नेहमभिवर्षति, या पतिं वृणुते, धर्मपत्नी सा अस्ति, सा अन्नपूर्णा अस्ति, सद्गृहिणी सा सम्राज्ञी चाऽस्ति। सा पृथिवी अस्ति धैर्यधारणात्, सा ऋगस्ति सामगानात्, सा वीणातन्त्रीरस्ति परिवारे समाजे च सामञ्जस्यत्वात्, सा नदी अस्ति निरन्तरगतित्वात, सा रजनी अस्ति सुखप्रदातृत्वात्, सा उषा अस्ति सौन्दर्यवृद्धित्वात्, सा विद्युज्ज्वाला अस्ति प्रकाशकत्वात्, सा प्रभा, श्रद्धा, विद्या, सेवा, क्षमा चास्ति आभा-स्नेह-ज्ञान-श्री-ऐश्वर्यत्वात्। एवम्प्रकारेण यत्र वेदाः स्त्रियः गुणगानं कुर्वन्ति महत्त्वञ्च सर्वत्रैव ख्यापयन्ति तत्र मनुरप्याह-

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तेत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते, सर्वांस्तत्राऽफलाः क्रियाः॥**[७६]

अन्ते शङ्कराचार्यकृतां मातृस्तुतिं गायन् समापयामि शोधपत्रम्-

**आस्तां तावदियं प्रसूतिसमये दुर्वारशूलव्यथा,**
**नैरुच्ये तनुशोषणं मलमयी शय्या च सांवत्सरी।**
**एकस्यापि न गर्भभार-भरणक्लेशस्य यस्याः क्षमो**
**दातुं निष्कृतिमुन्नतोऽपि तनयस्तस्यै जनन्यै नमः ॥**

**सन्दर्भसूची**


१. दो अवखण्डने-पा. धा. पा.
२. अदितिः स्वरूपेण अखण्डिता देवी विदुषी स्त्री-ऋग्०६.४०.२ पर महर्षिदयानन्दकृतभाष्यम्
३. अदितिः अदीना देवमाता-निरु. ४.२२
४. आत्मस्वरूपेण अविनाशिनि-यजु०८.४३,म.दया.कृत
५. निघं. १.१,१.११,२.११
६. ऋग् ०२.२१.३
७. यजु. १०.९
८. यजु.२८.२४
९. यजु.०८.४३
१०. यजु.८.४६ म.दया. कृतान्वयः
११. ऋग्.०६.४१.५
१२. यजु.११.६१
१३. यजु.१३४
१४. ऋग्.८.१८.४
१५. ऋग्.८.१८.४
१६. ऋग्.८.१८.४
१७. ऋग्.८.१८.४
१८. ऋग्.८.६७.१०
१९. ऋग्.८.१६७.१०
२०. ऋग्.८.६७.१०
२१. ऋग्.८.६७.१०
२२. यजु.२१.४
२३. यजु.२१.४
२४. यजु. २१.४
२५. यजु. २१.४
२६. निघं.१.११,१.१३
२७. ऋग्.१.२..१०
२८. ऋग्.१.३.१०
२९. ऋग्.२.४१.१८
३०. ऋग्.५.४३.११
३१. ऋग्.४.४३.११
३२. ऋग्.६४९.७
३३. ऋग्.६.४९.७
३४. ऋग्.६.४९.७
३५. ऋग्.६.४९.७
३६. ऋग्.६.४९.७
३७. ऋग्.६.४९.७
३८. ऋग्.६.९६.३
३९. यजु.२.२०
४०. ऋग्.१.६१०
४१. अथर्व.७.६८.३
४२. अथर्व.७.६८.३
४३. ऋग्.६.१.१३
४४. ऋग्.७.९६.३
४५. योषा वै सरस्वती॥ शत.ब्रा.२.४.१.११
४६. यजु.१९.८३
४७. जु.१९.८२
४८. यजु.२०.६४
४९. यजु.२१.५३
५०. यजु.९.२७
५१. निरु.२.१९,१२.६
५२. ऋग्.१.९२.३
५३. ऋग्.१.९२.१
५४. ऋग्.१.११३.१९
५५. ऋग्.१.११३.७
५६. ऋग्.१.१२३.१०
५७. जायेदस्तं मघवन्त्सेदु योनिस्तदित्त्वा युक्ता हरये वहन्तु।
५८. महाभारत-१२.१४५.६
५९. त्वं सम्राज्ञ्येधि पत्युरस्तं परेत्य। अथर्व. १४.१.४३
६०. ऋग्. १०.८४.४६
६१. ऋग्. १०.८६.१०
६२. अथर्व. १४.१.६४
६३. ऋग् १.६१.१
६४. ऋग् १०.१४९.२
६५. ऋग् १०.१५९.५
६६. ऋग् १०.१४६.३
६७. ऋग् ५.२८.१,३१.५-८,१०.११४.१-३,१०.८५.४६
६८. शत.ब्रा. ३.३.३१
६९. यजु.५.१२
७०. ऋग्.८.१८५
७१. ऋग्.१०.१५९.३
७२. ऋग्.१०.४७.२,३,४,५
७३. युज.२०.५४,८५,८६
७४. ऋग्.१०.१७.७
७५. यजु.६.३१
७६. मनु.३.५६


# श्रीमत्भगवत्परशुरामाय नमः

# श्रीपरशुरामाष्टकम्



आचार्य राधेश्याम अवस्थी ''रसेन्दु''

विप्र वंशावतंशं सदा नौम्यहम्।
रेणुकानन्दनं जामदग्ने ? प्रभो
द्रोहक्रोधाग्नि वैकष्टतां लोपकम्
रेणुकानन्दनं वन्दते सर्वदा।।1।।

क्षत्रदुष्टान्तकम् वै करस्थं धनुं
राजतेयस्य हस्ते कुठारं प्रभो।
फुल्लरक्ताब्ज नेत्रं सदा भास्वरं।
रेणुकानन्दनं वन्दने सर्वदा।। 2।।

तेजसं शुभ्र देहं विशालौकरौ
श्वेत यज्ञोपवीतं सदाधारकम्।
दिव्यभाले त्रिपुण्डं जटाजूवरम्।
रेणुकानन्दनं वन्दते सर्वदा।।3।।

भक्तपालं कृपालं कृपासागरम्
रौद्ररूपं करालं सुरैः वन्दितैः
जन्मतः ब्रह्मचारी व्रतीधारकः।
रेणुकानन्दनं वन्दते सर्वदा।।4।।

ज्ञानविज्ञानशक्तिश्च भण्डारकः।
वेदयुद्धेषु विद्यासु पारङ्गतः।
वासमाहेन्द्र शैले शिवाराधकः।
रेणुकानन्दनं वन्दते सर्वदा।।5।।

ज्ञानदाता विधाता सदाभूतले।
पापसंताप कष्टादि संहारकः
दिव्यभव्यात्मकं पूर्ण योगीश्वरम्।
रेणुकानन्दनं वन्दते सर्वदा।।6।।

आर्तदुः खादिकानां सदारक्षकः।
भीतदैत्यादिकानां सदा नाशकः।
त्रीन्गुणः सप्तकृत्वातुभूः दत्तकः
रेणुकानन्दनं वन्दते सर्वदा ।।7।।

शीलकारुण्यरूपं दयासागरम्।
भक्तिदं कीर्तिदं शान्तिदं मोक्षदम्।
विश्वमायापरं भक्त संरक्षकं।
रेणुकानन्दनं वन्दते सर्वदा।। 8।।

**भार्गवस्याष्टकं नित्यं, प्रातः सायं पठेन्नरः।**
**तस्यसर्वभयं नास्ति, भार्गवस्य प्रसादतः।।**

प्रथमपुटस्य शेषभागः **संस्कृतस्योत्थानाय प्रधानमन्त्रीमहोदयाः.....**

सन्दर्भे अपि च विविधाः संस्कृतस्योत्थानस्य विषयाः आसन्। प्रधानमन्त्रीभिः सुविचार्य अस्मिन् सन्दर्भे विषयानां क्रियान्वनस्य आश्वासनं प्रदत्तम्। प्रतिनिधिमण्डले दिल्लीविश्वविद्यालयस्य संस्कृतविभागस्य अध्यक्षाः प्रो.रमेशभारद्वाजमहोदयाः, दिल्लीसंस्कृतशिक्षकसंघस्य डॉ.वी.दयालुमहोदयाः डॉ.ब्रजेशगौतममहोदयः, शिक्षासंस्कृति-उत्थानन्यासस्य सचिवः श्रीअतुलकोठारीमहोदयाः उपस्थिताः आसन्।

# हिमाचलप्रदेशे राजकीयसंस्कृतमहाविद्यालये विविधसंस्कृतप्रतियोगितानामयोजनम्

नाहन-सिरमौरम् । हिमाचलप्रदेशस्य सिरमौरजनपदे नाहनस्थे राजकीयसंस्कृतमहाविद्यालये फरवरीमासे महाविद्यालयस्तरीयविविध संस्कृतप्रतियोगितानामायोजनं कृतम् । आयोजनमिदं महाविद्यालयस्य प्राचार्याणां श्रीप्रवीणकुमारमहोदयानामध्यक्षतायां जातम् । कार्यक्रमस्य संयोजनं महाविद्यालयस्य ज्योतिषाचार्येण श्रीवेदप्रकाशशर्मणा कृतम् । कार्यक्रमस्यारम्भः शास्त्रीतृतीयवर्षस्य छात्रैः वैदिकमङ्गलाचरणेन कृतम् ।

अत्र संस्कृतकवितागायन-श्लोकोच्चारण-सूत्रान्त्याक्षरी-श्लोकान्त्याक्षरी- ग्रन्थकण्ठस्थीकरणादिप्रतियोगिताः प्रमुखाः आसन् । महाविद्यालयस्य दर्शनाचार्येण श्रीतिलकराजमहोदयेन तथा च वेदाचार्येण डॉ.सन्नीकुमारेण निर्णायकमण्डलस्य भूमिका निर्वाहिता । महाविद्यालयीय छात्रैः छात्राभिश्च अतीवोत्साहपूर्वकं प्रतियोगितासु भागं गृहीतम् । द्विदिवसात्मकस्यास्य कार्यक्रमस्यान्ते अध्यक्षीयाभिभाषणे प्राचार्यमहोदयेन समस्तछात्राणामुत्साहवर्धनपूर्वकं तेषाम् उज्ज्वलभविष्यस्य कामना कृता ।






# देहल्याम् आर्यप्रतिनिधिसभया 14तमस्य आर्यहोलीमंगलमिलनस्य समारोहः समायोजितः

नवदेहली । दिल्ली-आर्यप्रतिनिधिसभापक्षतः होलिकोत्सवस्य उपलक्ष्ये आर्यपरिवाराणां सदस्यानां कृते चन्दनतिलकं कृत्वा पुष्पवर्षणं च कृत्वा समाजसेवीनां आर्याणां



श्रीधर्मपालमहोदयानामध्यक्षतायां रधुमलार्यन्याविद्यालये समारोहः आयोजितः ।

सार्वदेशिकार्यप्रतिनिधिसभायाः प्रधानेन श्रीसुरेन्द्रार्यमहोदयेन श्रीभगतसिंह-राजगुरु-सुखदेवादीनां देशभक्तानां कृते श्रद्धान्जलिपूर्वकं सर्वकारेण देशद्रोहीणां कृते उचितनियमनिर्माणं प्रस्तावं कृतम् । सांसदैः श्रीमनोजतिवारी, डॉसत्यपालमहोदयैः,



श्रीमतिकिरणमहोदया च कथितं यत् समाजस्योन्नत्यै देशस्य च स्वतन्त्रतायामार्यसमाजस्य महती भूमिका वर्तते । अद्यत्वेऽपि युवावर्गस्य कृते महत्वपूर्णप्रेरणास्त्रोतरूपेणार्यसमाजः कार्यं कुवन्नस्ति ।

अस्मिन् अवसरे पंजाबकेसरीलालालाजपतरायमहाभागानां वंशजाः श्रीरविभूषणराय तेषां च परिवारजनाः, श्रीयोगेशमुजांलः, श्रीअशोककुमारः, श्रीआनन्दकुमारः, अपि चान्ये गणमान्यजनाः उपस्थिताः आसन् ।

रघुमलार्यकन्याविद्यालयस्य तथा च महर्षिदयानन्दविद्यालयस्य छात्रैः छात्राभिश्च सांस्कृतिककार्यक्रमोऽत्र प्रस्तुतः । आर्यवीरदलस्य बालैः लालालाजपजरायमहोदयानां जीवनवृत्तोपरि आधारितमेकं नाटकं प्रस्तुतम् ।

अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः,
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- संदीप कुमार उपाध्याय, सन्नीकुमार, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।